**आदौ-मुख्यवार्ता:**

- राष्ट्रपति: द्रौपदीमुर्मु: मलावी-गणराज्यस्य राष्ट्रपतिना लाजरस-चकवेरा इत्यमुना साकं द्विपक्षीयोपवेशनानि विधाय विभिन्नेषु चत्वारि सहमतिपत्रेषु हस्ताक्षरं कृतवती।
- प्रधानमन्त्री नरेन्द्रमोदी अस्य मासस्य द्वादश दिनाङ्कात् रूसदेशस्य द्विदिवसीययात्रायां भविष्यति। यत्र असौ षोडशतमे ब्रिक्स इति शिखरसम्मेलने भागं ग्रहिष्यति।
- झारखण्ड विधानसभा निर्वाचनस्य प्रथम-चरणीय मतदानाय अद्य अधिसूचना निर्गमनेन सहैव नामांकनम् समारब्धम्। नामाङ्कनपत्राणि अस्य मासस्य पञ्चविंशति दिनाङ्कं यावत् पूरयितुं शक्यन्ते।
- हॉकीक्रीडायां मलेशियादेशे श्वः आरप्स्यमाणस्य सुल्तान आफ् जोहोर इति चषकस्य द्वादश तमे संस्करणे भारतीय कनिष्ठ हाकी दलं भागं भजिष्यति।

**अथ वार्ताः**

**राष्ट्रपति:**

राष्ट्रपति: द्रौपदीमुर्मु: त्रयाणाम् अफ्रीकीदेशानाम् अन्तर्गतं मलावीदेशस्य यात्राया: द्वितीये दिवसे अद्य मलावी-गणराज्यस्य राष्ट्रपतिना लाजरस-चकवेरा इत्यमुना साकं द्विपक्षीयोपवेशनानि विधास्यति। अद्यैव विभिन्नेषु प्रसङ्गेषु प्रतिनिधिमण्डलस्तरीयानि उपवेशनान्यपि विधास्यन्ति। विभिन्नेषु चत्वारि सहमतिपत्रेषु हस्ताक्षरेण सहैव भारतेन मलावीदेशाय एक सहस्र मेट्रिकटनतण्डुलानां वितरणमपि घोषितम् अस्ति। राष्ट्रपति: राष्ट्रिय-युद्धस्मारकं समाधिस्थलं प्रत्यपि गमिष्यति।

**पीएम-रूसः**

प्रधानमन्त्री नरेन्द्रमोदी अस्य मासस्य द्वादश दिनाङ्कात् रूसदेशस्य द्विदिवसीययात्रायां भविष्यति। यत्र असौ षोडशतमे ब्राजील्, रूस, भारत, चीन, दक्षिण आफ्रिका देशानां ब्रिक्स इति शिखरसम्मेलने भागं ग्रहिष्यति। कजाननगरे आयोक्ष्यमाणस्य शिखरसम्मेलनस्य विषयः न्यायपूर्णवैश्विकविकासस्य सुरक्षायाश्च बहुपक्षीयतायाः सुदृढीकरणे अस्ति तथा च

नेतृन् प्रमुखवैश्विकविषयेषु चर्चां कर्तुं महत्त्वपूर्णं मञ्चं प्रदास्यति। ब्रिक्स-इत्यनेन समारब्धानां उपक्रमाणाम् प्रगतेः समाकलनाय भविष्ये सहकार्यस्य सम्भाव्यक्षेत्रान् अन्वेष्टुं च बहुमूल्यं अवसरं प्रदास्यति। विदेशमन्त्रालयेन विज्ञप्तौ उक्तं यत् प्रधानमन्त्री मोदी यात्राकाले ब्रिक्ससदस्यदेशैः स्वसमकक्षैः च सह द्विपक्षीयोपवेशनं अपि करिष्यति इत्यपेक्षास्ति।

**विधानसभा निर्वाचनम्**

झारखण्ड विधानसभा निर्वाचनस्य प्रथम-चरणीय मतदानाय अद्य अधिसूचना निर्गमनेन सहैव नामांकनम् समारब्धम्। अस्मिन् चरणे त्रिचत्वारिंशत् नैर्वाचनिक क्षेत्रेषु मतदानानि भविष्यन्ति। नामाङ्कनपत्राणि अस्य मासस्य पञ्चविंशति दिनाङ्कं यावत् पूरयितुं शक्यन्ते। तदनु अष्टाविंशति दिनाङ्के अनुसन्धेयकार्यं नामाङ्कन पत्राणां भविष्यति। तावत् प्रत्याशिनः अस्य मासस्य त्रिंशद्दिनाङ्के नामाङ्कन प्रत्यावर्तनं कर्तुं शक्नुवन्ति। प्रथमचरणस्य मतदानं नवम्बरमासस्य त्रयोदश दिनाङ्के द्वितीयचरणस्य च विंशतिदिनाङ्के भविष्यति इति। तत्रैव मतगणना नवम्बरमासस्यैव त्रयोविंशति दिनाङ्के निर्धारितास्ति। अद्य अधिसूचनानिर्गमनेन सह उत्तरप्रदेशे अपि नव विधानसभासनानां उपनिर्वाचनार्थम् नामाङ्कनपत्राणां पञ्जीकरणं आरब्धम्। अस्य मासस्य पञ्चविंशतिः दिनाङ्कपर्यन्तं नामाङ्कनं दातुं शक्यते।

**विरामः**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

**पीएम-एनडीए-**

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् सुचारुशासनेन, द्रुतनिर्णयनिर्माणेन, शासनक्षेत्रे पारदर्शितायाः च कारणेन एनडीएशासितराज्येषु निवेशकान् आक्रष्टुम् अपि च निवेशं कर्तुं साहाय्यं कृतम्। ह्यः चण्डीगढनगरे एनडीए इति राष्ट्रिय लोकतान्त्रिक संयुते : नेतृणां सभां सम्बोधयन् श्रीमोदी अवदत् यत् एनडीएइति-सर्वकारः सामान्यनागरिकाणां वर्धमानाः आकांक्षाः पूरयति, अन्तिम श्रेन्यां यावत् सौविध्यानि-वितरणं सुनिश्चितं कर्तुं एनडीए-

सर्वकारस्य विशिष्टता जाता, येन चतुर्दशोत्तर द्विसहस्र तम वर्षात् जनाः सर्वकारं प्रति विश्वासं प्रकटीतवन्त: ।सुशासनस्य अर्थः अस्ति अन्ततः जनानां समाह्वानानां समस्यानां च समाधानकरणं अस्ति। सः अवदत् यत् समस्या निवारणेन सहैव समाधानकेन्द्रितं शासनं सर्वेषां एनडीए इति राज्यसर्वकारानाम् एकः विशिष्टः परिचयः अस्ति। हरियाणायां विजयं महत्त्वपूर्णं ऐतिहासिकं च कथयन् श्रीमोदी अवदत् यत् एनडीए-इत्यनने समाजस्य सर्वेषां वर्गाणां विश्वासः समर्थनं च प्राप्तम् अस्ति। भारतीय संविधानस्य निर्माणस्य पञ्च सप्ततिः वर्षाणि 'सम्विधानस्य अमृत महोत्सव' इति रूपेण आयोजयितुं अस्मिन् विषये अन्यः प्रस्तावः अपि पारितः । बिरसा मुण्डा, सरदार वल्लभभाई पटेल इत्युभयोः पञ्चाशदधिकैकशततम: जन्मदिवस:, अटलबिहारी वाजपेयी वर्यस्य जन्मशताब्दी वर्षः च आगामिवर्षे आयोजयितुं संकल्पः अपि कृतः ।

**<u>राजनाथ-डीआरडीओ</u>**

रक्षामन्त्री राजनाथसिंहः अद्य अवदत् यत् अपरम्परागतयुद्धेन रक्षाक्षेत्रे नवीनानि समाव्हानानि उत्पन्नानि। असौ अवदत्, प्रौद्योगिक्याः कारणात् अपरम्परागतयुद्धस्य एतत् हि नूतनं रूपं जातम्। रक्षामन्त्री राजनाथसिंहः नवदिल्ल्यां "**डेयर टु ड्रीम**" पञ्च दशमलव शून्यं इत्येतस्या: नवीनप्रतियोगितायाः शुभारम्भे सम्बोधितवान्। नवाचारं प्रति सर्वकारस्य प्रतिबद्धतां प्रकाशयन् श्रीसिंह: रक्षाक्षेत्रे अनुसन्धानस्य विकासस्य च संवर्धमानं महत्त्वं बोधितवान्। सः अवदत् यत् यथा-यथा विश्वे परिवर्तनं दृश्यते तथा-तथा प्रौद्योगिक्याः महत्त्वं, अनुसन्धानविकासः च समानगत्या वर्धते। सः अवदत् यत् देशस्य रक्षाक्षेत्रं अधिकं नवीनं प्रौद्योगिकी-प्रधानं च कर्तुं सर्वकारः समर्पितः अस्ति। पारम्परिकयुद्धस्य परिवर्तनशीलतायाः विषये मन्त्री अवदत् यत् अद्यत्वे प्रौद्योगिक्याः कारणेन शस्त्रेषु उपकरणेषु च प्रमुखपरिवर्तनानि दृश्यन्ते। सः रक्षाक्षेत्रे निजक्षेत्राणाम् अधिक सहभागितायाः आह्वानं कृतवान्, सतत संशोधन स्य, विघटनकारीप्रौद्योगिकीनां च विषये ध्यानं दातुं आग्रहं अपी कृतवान्। सः "**डेयर टु ड्रीम**" इति उपक्रमस्य प्रतिभागिभ्यः अभिनन्दितवान् यत् यदा युवानः किमपि नूतनं स्वप्नं द्रष्टुं साहसं कुर्वन्ति तदा तान् स्वप्नान् प्राप्तुं नवीनान् मार्गान् निर्मातुं शक्नुवन्ति।

**स्मोग्-दिल्ली**

शिशिर-ऋतोः पूर्वं दिल्ली राष्ट्रीय राजधानी क्षेत्रं धूमेन आच्छादिता जाता। केन्द्रीयप्रदूषणनियन्त्रणमण्डलस्य (CPCB) इत्यस्य अनुसारि अद्य प्रातः वायुगुणवत्तासूचकाङ्कः द्विनवत्यधिक द्विशतं इति नगरस्य वायुगुणवत्ता निम्नवर्गे आगतः। सद्यः एव प्रधानमन्त्रिणः प्रमुखसचिवः डॉ.पी.के.मिश्रा वर्येण राष्ट्रियराजधान्यां रज उत्सर्जनं न्यूनीकर्तुं मार्गेषु च पादपैः हरितकरणाय, मार्गेषु मिशन-मोड्- दृष्टिकोणं स्वीकरणे बलं दत्तम् आसीत्। निम्नां वायुगुणवत्तां दृष्ट्वा दिल्लीनगरस्य पर्यावरणविभागेन अद्य सर्वेषां सम्बन्धिताधिकारिणां आपत्कालिकोपवेशनं आमन्त्रितम् । राष्ट्रियराजधान्यां, तत्समीपस्थेषु क्षेत्रेषु च वायुगुणवत्तायां क्षयः आरब्धः अस्ति । तदनु लोकनिर्माणविभागेन राष्ट्रियराजधान्याः अनेकेषु क्षेत्रेषु मार्गेषु च जलसिञ्चनं क्रियते येन धूमकणानि न्यूनीकर्तुं शक्यते।

**हॉकी- जोहोर सुल्तानः**

हॉकीक्रीडायां मलेशियादेशे श्वः आरप्स्यमाणस्य सुल्तान आफ् जोहोर इति चषकस्य द्वादश तमे संस्करणे भारतीय कनिष्ठ हाकी दलं भागं भजिष्यति।

**।।इति वार्ता:।।**